# संस्कृत-वार्ता:
**दिनाङ्क :-13.08.2024**
**प्रात: - 06:55**

**अथ वार्ता:**

**ई.पी.एफ.ओ. सजवसत्रम्**

ई.पी.एफ.ओ. इति कर्मचारिभविष्यनिधिसङ्गठनम् अद्य 'ई.पी.एफ. स्थानान्तरणम्' इत्यस्मिन् विषये स्वकीयस्य पञ्चम-सजवसत्रस्य आयोजनं कुर्वद् अस्ति। सदस्यान् सेवा निवृत भोक्तर: च विविधसेवानां विषये प्रशिक्षण प्रदानम् एव अस्य सत्रस्य उद्देश्यम् अस्ति। ई.पी.एफ.ओ. इत्यस्य आधिकारिकसंजालपटले अस्य साक्षात् सत्रस्य प्रसारणं भविष्यति।

**सूचनाप्रसारणमन्त्रालय:**

सूचनाप्रसारणमन्त्रालयेन प्रसारणसेवानां विनियमन विधेयकस्य प्रारूपे टिप्पणीनां प्राप्तेः समयः अस्य वर्षस्य पञ्चदश अक्टूबर् पर्यन्तं विस्तारितः। मंत्रालयेन उक्तं यत् विस्तृतपरामर्शानन्तरं नूतनं विधि-प्रारुपं प्रकाशयिष्यते। अवधेयं वर्तते यत् विधेयकस्य प्रारुपं गतवर्षस्य नवम्बरमासे हितधारकाणां सामान्यजनानां च व्याख्यात्मकटिप्पणीनां कृते सार्वजनिकक्षेत्रे स्थापितः आसीत्। मन्त्रालयेन उक्तं यत्, विधेयकस्य प्रारुपे विभिन्नसङ्घैः सह बहुविधाः अनुशंसाः, टिप्पण्याः परामर्शा : च प्राप्ताः।

**निर्फ**

उच्चशिक्षण-संस्थानां कृते राष्ट्रियसंस्थागतक्रमाङ्कनरूपरेखायां (एनआईआरएफ) चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य समग्रवर्गे आई.आई.टी.-मद्रास इति शीर्षस्थानं भजते। भारतीयविज्ञानसंस्थानं, बेङ्गलूरु इति, द्वितीयस्थानं प्राप्तवत् तथा च आई.आई.टी.-मुम्बई इति चतुर्विंशत्यधिकद्विसहस्रवर्षेस्मिन् सूच्यां तृतीयस्थाने अस्ति।, ह्यः नवदिल्ल्यां केन्द्रीयशिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन इमा सूचना प्रकाशिता। अस्मिन् अवसरे प्रवदता मन्त्रिणा उक्तं यत् क्रमाङ्कनं मान्यता च विंशत्यधिकद्विसहस्रतमवर्षस्य राष्ट्रियशिक्षानीतेः (एनईपी) इत्यस्यानुसारं प्रमुखौ स्त:। सर्वाणि शैक्षणिकसंस्थानि च अस्य अन्तर्गतं अवश्यमेव भवितव्यानि। सः अवदत् यत् देशे अष्टपञ्चाशत् सहस्राधिकानि शैक्षणिकसंस्थानानि सन्ति, सार्धषट्सहस्राणि च निर्फ इत्यस्य व्यवस्थायाः अन्तर्गतं आगतानि सन्ति।

अपि च विश्वविद्यालयवर्गे भारतीयविज्ञानसंस्थानं बेङ्गलूरु इति, नवदिल्ल्या: जवाहरलालनेहरूविश्वविद्यालयः, जामियामिलियाइस्लामियाविश्वविद्यालयः च शीर्षेषु त्रिषु स्थानेषु सन्ति।

**सूर्य-घर-मुफ्त बिजली योजना**

प्रशासनेन प्रधानमन्त्री-सूर्य-घर-मुफ्त बिजली-योजनाया: अन्तर्गतं प्रारूपित-सौर-ग्रामस्य कार्यान्वयनाय एक: परिचालन-दिङ्निर्देश: प्रख्यापित:। नवीननवीकरणीयोर्जा-मन्त्रालयेन समुदीरितं यत् अस्या: योजनाया: अन्तर्गतम् समग्रप्रदेशे प्रतिजनपदे एकं प्रारूप-सौर-ग्रामं निर्मातुं बलं प्रदत्तमस्ति। तथा च अस्मै घटकाय आहत्य अष्टशतं कोटिरूप्यकाणि आवण्टितानि।

**भारतस्य ऋतुविभागेन**

भारतस्य ऋतुविभागेन इत्यनेन आगामिदिनद्वयस्य कृते देशस्य मध्य-पूर्वोत्तर-दक्षिणभागेषु च नारङ्ग-वार्णिकी सन्चेतना-प्रसारिता अस्ति। आईएमडी-इत्यस्यानुसारं राजस्थान-उत्तर-प्रदेश-पूर्व-पूर्वोत्तर भारते च आगामिषु सप्तदिवसेषु विभिन्नक्षेत्रेषु तीव्रवृष्टिः निरन्तरं भविष्यति। आकाशवाण्या सह चर्चायां ऋतु-वैज्ञानिकः आरके जेनामणिः अवदत् यत् पूर्वीराजस्थान मध्यप्रदेश भारतस्य पश्चिमभागस्य च कृते रक्त वार्णिकी सञ्चेतनापि प्रसारितास्ति।

**।।इति वार्ता:।।**